# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा - शास्त्री-२ ( Sem_4 )** **प्रश्नपत्र-८** **गुणाः - ७०**

**विषयः - धर्मशास्त्रम्** CE 2.4.8 **समयः - ०३:०० तः ०६:००**

**दिनाङ्कः** - 26/04/2016 **सन्दर्भग्रन्थः - मनुस्मृति-मन्वर्थटीका -अध्यायाः-७-८**

---

**विभागः - १**

**प्रश्न-१ द्वयोः प्रसङ्गपूर्वकं व्याख्या कार्या । ०८**

१. दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति । दण्डः सप्तेषु जगर्ति दण्डं धर्म विदुर्बुधाः ॥

२. कामजेषु प्रसक्तो हि व्यसनेषु महीपतिः । वियुज्यतेऽर्थधर्माभ्यां क्रोधजेष्वात्मनैव तु ॥

३. साम्ना दानेन भेदेन समस्तैरथवा पृथक् । विजेतुं प्रयतेतारीन्न युद्धेन कदाचन ॥

**प्रश्न-२ कस्यापि एकस्य सविस्तरमुत्तरं लिखत । ०८**

१. दण्डप्रकरणं ग्रन्थोक्तदिशां वर्णयत ।

२. श्रेष्ठनृपस्य लक्षणानि प्रतिपादयत ।

**प्रश्न-३ टिप्पणीद्वयं लिखत । ०४**

१. व्यसनं कष्टमुच्यते ।

२. सचिवलक्षणानि ।

३. युद्धेराज्ञः कर्तव्यानि ।

४. राजनीतिः ।

**प्रश्न-४ पञ्चानां लघूत्तरं लिखत । ०५**

१. राष्ट्रस्य रक्षणे राज्ञः किं कर्तव्यम्?

२. व्यसनीपुरुषस्य का गतिर्भवति?

३. कीदृशं योद्धारं न हन्यात्?

४. राष्ट्राभिवृद्धये राजा कान् गुणान् आश्रयेत?

५. युद्धव्यूहनामानि लिखन्तु ।

६. प्रतिज्ञाभङ्गः कथं भवति?

७. व्यवहारः कीदृशः अपेक्षितः?

**विभागः - २**

**प्रश्न-५ द्वयोः श्लोकयोः ससन्दभप्रसङ्गं संस्कृते व्याख्या कार्या । ०८**

१. यस्मिन् देशे निषीदन्ति विप्रा वेदविदस्त्रयः । राज्ञश्चाधिकतो विद्वान् ब्रह्मणस्तां सभां विदुः ॥

२. धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः । तस्माद्धर्मो न हन्तव्यो मा नो धर्मो हतोऽवधीत् ॥

**प्रश्न-६ एकस्य सविस्तरेणोत्तरं लिखत। ०८**

१. करग्रहणं ग्रन्थोक्तदिशा वर्णयत।

२. ग्रन्थोक्त साक्षीनिर्णयं लिखत।

३. दण्डस्य महत्तां वर्णयन्तु।

**प्रश्न-७ एका टिप्पणीं लेख्या। ०२**

१. साक्षिणः अनृतभाषणे दोषाः।

२. क्रयविक्रयनिर्णयः।

**प्रश्न-८ द्वयोः अतिलघूत्तरे लिख्येताम्। ०२**

१. दण्डनीतिं प्रतिपादयत।

२. सास्थीभावे निर्णयः कथं करणीयः?

३. चौराणां शिक्षा केन प्रकारेण भवति?

**विभागः - ३**

**प्रश्न-९ द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं विलिख्य संस्कृते व्याख्या कार्या। ०८**

१. क्षन्तव्यं प्रभुणानित्यं क्षिपतां कार्यिणां नृणाम्। बालवृद्धातुराणां च कुर्वता हितमात्मनः॥

२. योऽरक्षन्बलिमादत्ते करं शुल्कं च पार्थिवः। प्रतिभागं च दण्डं च स सद्यो नरकं व्रजेत्॥

३. ध्वजाहृतो भक्तदासो गृहजः क्रीतदत्रिमौ। पैत्रिको दण्डदासश्च सप्तैते दासयोनयः॥

**प्रश्न-१० एकस्य सविस्तरेणोत्तरं लिखत। ०८**

१. वेतनसम्बन्धि निर्णयान् लिखन्तु।

२. कन्यायाः दोषत्वं विवेचयत।

३. ब्राह्मणस्य दण्डे नियमाः।

**प्रश्न-११ टिप्पणीद्वयं लिखत। ०४**

१. न्यायव्यवस्था।

२. चौराणां शिक्षानिर्णयः।

३. परस्त्रीगमने दण्डनियमाः।

**प्रश्न-१२ पञ्चानां लघूत्तराणि लिखत। ०५**

१. के के दासयोनयः सन्ति?

२. सप्तमाध्याये कति श्लोकाः सन्ति?

३. के दण्डार्हाः न सन्ति?

४. दण्डस्य कति स्थानानि सन्ति? कानि च तानि?

५. प्रथमापराधे कीदृशो दण्डः कार्यः?

६. को नाम राजा?

७. नृपेण सर्ववस्तुदानं कस्मै करणीयम्?